# MT

Seat No. 

2018 .... .... 1100

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - 5**

**Time : 3 Hours** **(Pages 12)** **Marks : 100**

प्रथमः विभागः - सुगमसंस्कृतम् ।

प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४) ४

| | | | | | |
|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  |
| | | | | | |
| ४ | मरीचिका  | ५ |  | | |
| | | | | | |

प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २) २

१. १२ - २. चत्वारि -

३. सप्तनवतिः -

**प्र.१ इ) स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | पञ्चवादनम् | १:४५ |
| २. | सार्ध-पञ्चवादनम् | ५:०० |
| ३. | सपाद-दशवादनम् | ५:३० |
| ४. | पादोन-द्विवादनम् | १०:१५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| ______ सोमवासरः | ← | परह्यः ______ | ← | ______ बुधवासरः | ← | अद्य गुरुवासरः |
|---|---|---|---|---|---|---|

**प्र.१ उ) उदाहरणद्वयं लिखत । (६ तः ५)** ५

१. व्यञ्जने -
२. मूर्धन्यौ -
३. अकारान्तस्य -
४. व्यञ्जनान्तस्य -
५. चतुर्थगणस्य धातू -
६. प्रथमगणस्य धातू -

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

आसीत् सुदासो नाम कश्चिदुद्यानपालः । तस्य तडागे कदाचित् सत्यपि शिशिर-ऋतावेकं पद्मं व्यकसत्, व्योम्नीव बालसूर्यबिम्बम् । सोऽचिन्तयत्, 'अहो महिमा परमात्मनः, यदेतादृशे कालेऽतिशीते विभूषितो मे तडाग एतस्य सरसिजस्य विकासेन । एतत् सरसिजं विक्रीयाहं विपुलं धनं प्राप्नुयाम्' इति । एवं सञ्चिन्त्य स तद् विक्रेतुं राजसद्मनः पुरतः स्थितः । अत्रान्तरे तेनैव अध्वना कश्चित् श्रीमान् सार्थवाहः समायातः । सोऽवदत्, 'भद्र, भगवान् सुगतः सम्प्रत्येतस्मिन्नगरे वसति । महात्मनः तस्य पूजार्थमिदं कमलमभ्यर्थये । तत्कियता मूल्यने ददासि ?' उद्यानपालोऽब्रवीत्, 'एकेन सुवर्णनाणकेन' । अथ स सार्थवाहः यावत्तत् कमलं क्रेतुमिच्छति, तावदेवापरो धनवान् श्रेष्ठी अपि सुगतदर्शनार्थं गच्छन् तत्र समुपस्थितः । नीरजमूल्यं पृच्छन्तं तं श्रेष्ठिनम् उद्यानपालोऽब्रूत 'एष महाभाग एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति' । श्रेष्ठी अगदत्, 'अहं दश सुवर्णनाणकानि यच्छामि' । सार्थवाहोऽभणत्, 'अहं शतं सुवर्णनाणकानि प्रयच्छामि' । तयोर्विवादं श्रुत्वा सुदासो व्यमृशत् 'यस्य कृते एतौ कमलमेतत् क्रेतुमिच्छतः, नूनं स सुगत एवाधिकतमं मूल्यं मह्यं दद्यात्' इति । अतः स उद्यानपालस्तावभाषत 'नैतद् भो विक्रेतुमिच्छामि' इति ।

१. **अवबोधनम् । (४ तः ३)**

क) **उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

सुदासः राजसद्मनः पुरतः स्थितः यतः ..............

(अ) सः सरसिजं विक्रेतुम् इच्छति स्म।

(ब) सः राजानं द्रष्टुम् इच्छति स्म।

ख) **कः कं वदति ।** १

''एषः महाभागः एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति।''

ग) **पूर्णवाक्येन उत्तरं लिखत ।** १

पद्मं कीदृशम्?

घ) **वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

कमलस्य विकासेन तडागः विभूषितः।

२. **शब्दज्ञानम् । (३ तः २)**

क) **गद्यांशतः ल्यबन्त-अव्यये चित्वा लिखत ।** १

ख) **प्रश्ननिर्माणं कुरुत ।** १

सुगत एवाधिकतमं मूल्यं **मह्यं** दद्यात् ।

ग) **सन्धिविग्रहं कुरुत ।** १

सत्यपि - ....... + ....... ।

३. **पृथक्करणम् ।** २

**क्रमेण योजयत ।**

(१) सुदासस्य धनप्राप्तेः इच्छा।

(२) सार्थवाहस्य कमलक्रयणस्य इच्छा।

(३) सार्थवाहः शतं सुवर्णनाणकानि दातुं सिद्धः।

(४) श्रेष्ठी दश सुवर्णनाणकानि दातुमिच्छति।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| | | |
|---|---|---|
| अर्णवः | - | द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु ? |
| पिता | - | सत्यम् । अयं खलु कणादमहर्षेः सिद्धान्तः । अपि जानासि ? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम् । तदपि प्रायः ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके । |
| अर्णवः | - | तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये ? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः । |
| पिता | - | कणादमुनिना प्रतिपादितम् - परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च । 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता । |
| अर्णवः | - | का सा व्याख्या ? |
| पिता | - | जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।<br>तस्य षष्ठतमो भागः परमाणुः स उच्यते ।। |
| अर्णवः | - | अहम् एतद्विषये विस्तरेण पठितुम् इच्छामि । |
| पिता | - | उत्तमम् ! श्वः मम महाविद्यालयम् आगच्छ । तत्र कणादविषयकाणि नैकानि पुस्तकानि सन्ति । तव जिज्ञासा निश्चयेन शाम्येत् । |

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

(१) ................ द्रव्यस्य मूलकारणम्। (परमाणुः / विज्ञानं)

(२) रजसः ............. भागः परमाणुः। (षष्ठतमः / शततमः)

**ख) पूर्णवाक्येन उत्तरत ।** १

कः परमाणुः?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

अर्णवस्य पितुः महाविद्यालये कणादविषयकाणि नैकानि पुस्तकानि सन्ति ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**

**क) गद्यांशतः तृतीया-विभक्त्यन्तपदे चित्वा लिखत ।** १

**ख) मेलनं कुरुत ।** १

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| सूक्ष्मः | रजः |
| सूक्ष्मम् | तत्त्वम् |
| | परमाणुः |

**ग) लकारं लिखत ।** १

तव जिज्ञासा निश्चयेन **शाम्येत्** ।

**३. पृथक्करणम् ।** २

**क्रमेण योजयत।**

(१) पितुः स्वस्य महाविद्यालये निमन्त्रणम् ।

(२) 'वैशेषिकसूत्राणि' इति ग्रन्थविषये चर्चा ।

(३) पित्रा कणादमहर्षेः सिद्धान्तविषये कथनम् ।

(४) अर्णवस्य विस्तरेण पठनस्य इच्छा ।

**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

(ततः प्रविशति वैखानसः, अन्यौ तापसौ च)

वैखानसः - (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः न हन्तव्यः । आशु प्रतिसंहर सायकम् । राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः - प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः - राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते । प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः ।

२.

(ततः प्रविशति याचकरूपेण शक्रः ।)

शक्रः - (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे ।

कर्णः - दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।

शक्रः - (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत्। यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे? भवतु, दृष्टम् । (प्रकाशम्) भोः कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः ।

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

(१) शक्रस्य कपटं विशदीकुरुत ।

(२) सुदासः सुगतचरणाभ्यां कमलं किमर्थं समर्पितवान्?

(३) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

**तृतीयः विभागः - पद्यम् ।**

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा ॥१॥
घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम् ।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ॥२॥

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

मनुजः किं भिन्द्यात् ?

**ख) सन्धिविग्रह कुरुत ।** १

कुर्याद्रासभरोहणम् - ....... + ....... ।

**ग) जालरेखाचित्रं पूरयत ।** २




**प्र.३ आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

उत्तमो नातिवक्ता स्यादधमो बहु भाषते ।
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते ॥१॥
रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः ।
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥२॥

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कः बहु भाषते ?

**ख) सन्धिविग्रहं कुरुत ।** १

स्यादधमो - ....... + ....... ।

**ग) माध्यमभाषया उत्तरत ।** २

'क्रियासिद्धिः सत्त्वे भवति' इति सूर्यस्य उदाहरणेन स्पष्टीकुरुत ।

**प्र.३ इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** ६

१. **क.** प्रथमवयसि विस्मरन्ति ॥ **ख.** यदा ....... व्यपगतः ॥

२. **ग.** यत्र ....... द्रुमायत ॥ **घ.** यादृशं ....... फलम् ॥

**प्र.३ ई) अन्वयं पूरयत ।** २

शुकसारिकाः ....... मुखदोषेण ....... । तत्र ....... न बध्यन्ते । (यतः) ....... सर्वार्थसाधनम् ।

**प्र.३ उ) माध्यमभाषया सरलार्थं लिखत । (३ तः २)** ४

(१) शीलं सदगुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ॥

(२) वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ॥

(३) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ॥

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**क) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** ३

१. रुच्-रोच् - २. स्निह् -

३. पत् - ४. गम्-गच्छ् -

५. दा - यच्छ् -

**ख) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

(१) अरण्ये **मृगः** काकः च स्नेहेन निवसतः ।

(२) नूनं सः **सुगतः** एव अधिकतमं मूल्यं दद्यात् ।

(३) यत्र एकः अपि **पादपः** नास्ति तत्र एरण्डः द्रुमायते ।

(४) **भूपालः** पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट् ।

**प्र.४ आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत । (३ तः १)** ५

१. मम प्रियः उत्सवः । २. मम प्रियः खगः । ३. मम प्रियः नेता ।

**अथवा**

१. गृहसंवादः। २. शालासंवादः। ३. कार्यालयसंवादः।

**प्र.४ इ) निर्दिष्टां कृतिं कुरुत ।**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।** ५

१.




(**मञ्जूषा** - पश्यति, क्रीडति, धावति, क्षिपति, नयति, क्रीणाति, उपविशति, चालयति)

**अथवा**

**प्र.४ इ) संस्कृतानुवादं कुरुत । (८ तः ५)**

(१) An apple is beneficial for health.

(२) The monkey eats bananas.

(३) Sunita smells a rose.

(४) Rangoli is seen in front of the house.

(५) Lord Ganesha likes shoe-flower.

(६) A scientist examines through the microscope.
(७) The Curtain obstructs the light.
(८) A parrot desires pomegranate.

## पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) तालिकापूर्तिं कुरुत ।**

**१. नामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कवौ | ............ | ............ | सप्तमी |
| ............ | पितृभ्याम् | ............ | तृतीया |
| ............ | ............ | ब्रह्माणि | प्रथमा |

**२. सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | ............ | अस्मभ्यम् | चतुर्थी |
| भवन्तम् | ............ | ............ | द्वितीया |
| ............ | सर्वभ्याम् | ............ | पञ्चमी |

**३. क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लट् | ............ | लभेते | ............ | प्रथमः |
| लोट् | कुरु | ............ | कुरुत | मध्यमः |
| लङ् | ............ | ............ | अयच्छाम | उत्तमः |

**४. धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| रम् (१ आ.प.) | ............ | रतवान् | ............ | रममाणः |
| ज्ञा (९ उ.प.) | ज्ञातः | ............ | ज्ञातव्यः | ............ |
| प्र + विश् (६ प. प.) | ............ | ............ | प्रवेश्यः | प्रविशन् |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

**१) योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. माता .................... (५) मम युतकं प्रक्षालितवती । (आवृत्तिवाचकः)

२. .................... (४) वेदाः वर्तन्ते । (सङ्ख्यावाचकः)

३. भवने मम गृहं ............... (७) तले वर्तते। (सङ्ख्यावाचकः)

४. वर्षस्य ................... (४) परीक्षा भवति। (आवृत्तिवाचकः)

५. भगवता व्यासेन .................. (१८) पुराणानि रचितानि। (सङ्ख्यावाचकः)

**२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | **समस्तपदम्** | **समासविग्रहः** | **समासनाम** |
|---|---|---|---|
| १. | ............ | आनन्देन सह । | अव्ययीभावः समासः । |
| २. | भालचन्द्रः | भाले चन्द्रः यस्य सः । | ............ |
| ३. | विद्याधनम् | ............ | कर्मधारयः समासः । |
| ४. | ............ | पादैः पिबति इति । | उपपद-तत्पुरुषः समासः । |
| ५. | अशक्यम् | ............ | नञ्-तत्पुरुषः समासः । |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत। (५ तः ३)** ३

१. कमलम् -
२. पुरतः ×
३. पुष्पम् -
४. बहूनि ×
५. कृशः ×

**४) सूचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. महर्षिणा परमाणोः व्याख्या कृता । (वाच्यपरिवर्तनं कुरुत ।)

ख. तयोः विवादं श्रुत्वा सुदासः व्यमृशत् । (पूर्वकालवाचकं निष्कासयत ।)

ग. त्वं धनुः त्यज । ('त्वं' स्थाने 'भवान्' योजयत ।)

घ. वयं तु केवलं तस्य महाभागस्य नामधेयं जानीमः । (एकवचने परिवर्तयत ।)

ङ. अहं विस्तरेण पठितुम् इच्छामि । (लङ्लकारे परिवर्तयत ।)

**५) वाक्यं शुद्धं कुरुत । (५ तः ३)** ३

१. **एकं** बालिका पाठं न अस्मरत् ।

२. **सवित्रा** अभितः ग्रहाः भ्रमन्ति ।

३. भवान् किं **करोषि** ?

४. **इदं** पात्राणि स्वच्छानि सन्ति ।

५. **तिस्र** फलानि आनय ।

## षष्ठः विभागः - अपठितम् ।

**प्र.६ अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)**

| |
|---|
| अस्माकं परिचितः एषः आम्रवृक्षः। एषः वृक्षः उन्नतः विस्तीर्णः च अस्ति। न केवलं तस्य पक्वानि फलानि अस्मभ्यं रोचन्ते अपि तु अपक्वानि अपि। वसन्ते ऋतौ अपक्वानि आम्रफलानि भवन्ति तानि एव ग्रीष्मे पक्वानि मधुराणि च जायन्ते। वसन्ते ऋतौ एतस्मिन् नूतनाः पल्लवाः विलसन्ति। अनन्तरं मञ्जर्यः विराजन्ते। मञ्जरीणां सुगन्धेन सर्वपरिसरः सुगन्धितः भवति। तदा आम्रवृक्षस्य शोभा अवर्णनीया भवति। फलानां भारेण नतं आम्रवृक्षं दृष्ट्वा सर्वे आनन्दन्ति। आम्रवृक्षस्य छाया निबिडा शीतला च भवति। आतपेन तप्ताः जनाः तस्य छायाम् आश्रयन्ते आनन्दिताः च भवन्ति। |

**१) पूर्णवाक्येन उत्तरं लिखत ।** १

पक्वानि फलानि कदा जायन्ते?

**२) प्रातिपदिकं लिखत ।** १

१) एतस्य - ...............

२) आम्रवृक्षम् - ...............

**३) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** १

अपक्वानि आम्रफलानि न मधुराणि।

**४) माध्यमभाषया सरलार्थं लिखत ।** १

न केवलं तस्य पक्वानि फलानि अस्मभ्यं रोचन्ते अपि तु अपक्वानि अपि ।

**५) गद्यांशात् तृतीयान्तपदानि चित्वा लिखत ।** १

६) **कारकपरिचयं कुरुत ।** १

मञ्जरीणां **सुगन्धेन** सर्वपरिसरः आनन्दितः भवति।

**प्र.६ आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| |
|---|
| अलङ्कारप्रियो विष्णुः, जलधाराप्रियः शिवः। |
| नमस्कारप्रियो भानुः, बालको भोजनप्रियः।। |

क) **पूर्णवाक्येन उत्तरं लिखत । (२ तः १)** १

(१) कः अलङ्कारप्रियः?

(२) कः भोजनप्रियः?

ख) **समानार्थकं शब्दं लिखत ।** १

शिवः -

**प्र.६ आ) - २) जालचित्रं पूरयत ।** २




**शुभं भवतु**